# Rameshvara Mahima Varnanam

# रामेश्वरमहिमवर्णनम्

## Document Information

Text title : Rameshvara Mahima Varnanam

File name : rAmeshvaramahimavarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhargAkhyaH panchamAMshaH | adhyAyaH 28||

Latest update : June 18, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 1, 2024

*sanskritdocuments.org*

# रामेश्वरमहिमवर्णनम्

रामः -
भगवन् शाम्भवश्रेष्ठ मामत्यन्तं सुदुःखितम् ।
समुद्धराव मां दीनं भार्याहरणकर्शितम् ॥ ४६॥

मुनीन्द्रोऽपि तदा रामं दीक्षयित्वा विधानतः ।
भस्मनोद्धूल्य तस्याङ्गं दत्वा पञ्चाक्षरं मनुम् ॥ ४७॥

गन्धमादनसंस्थं मां दर्शयामास भक्तितः ।
तल्लिङ्गं पूजयामास रामेण स तदा मुनिः ॥ ४८॥

बिल्वपत्रैर्वन्यपुष्पैः फलैर्नैवेद्यमातनोत् ।
तदा तुष्टाव रामो मां स्वकष्टविनिवृत्तये ॥ ४९॥

—
रामः -
श्रीकालकालानलभालमूल देव त्वमाद्यो जगतः प्रतिष्ठा ।
शूलामलोद्यत्कर बालपाल हालाहलालङ्कृतनीलकण्ठ ॥ ५०॥

त्वं भक्तिगम्योऽमरपाल शम्भो मालाकृताहीन्द्र विशालबाहो ।
लीलाकृतं ते जगदेकजालं मे दुःखमूलं सहसा हरस्व ॥ ५१॥

—
ईश्वरः -
इति स्तुत्वा तदा रामो गन्धमादनमीश्वरम् ।
तस्मै च दर्शनं दत्तं जेता त्वं रावणं मृधे ॥ ५२॥

गच्छेति च तदा चोक्तो मां प्रणम्याबिके तदा ।
अगस्त्येन तदा दत्तं खङ्गं चापि महाप्रभम् ॥ ५३॥

तूणीरं च शरैः पूर्णं ययौ भ्रात्रा समन्वितः ।
सेतुं मत्कृपया बद्धा युद्धे रावणमद्भुतम् ॥ ५४॥

सानुजं ससुतं हत्वा सीतां प्रपय महाबलः ।
पौलस्त्यवधसञ्जातब्रह्महत्यापनुत्तये ॥ ५५॥

धनुष्कोटिमहातीर्थे मासं स्नात्वा स भक्तितः ।
भ्रात्रा च भार्यया सार्धं वलीमुखसमन्वितः ॥ ५६ ॥

स नार्मदं समानीय लिङ्गं तत्पवनात्मजात् ।
स्थापयामास हृष्टात्मा मुनिना रावणान्तकः ॥ ५७॥

गन्धमादनपृष्ठे वै गन्धमादनशङ्करात् ।
पश्चिमे परमेशानि सम्पूज्यामरनायकम् ॥ ५८॥

रामेश्वरं तदा देवि स्वनाम्ना लिङ्गमुत्तमम् ।
समर्चयित्वा बिल्वाद्यैः पूजया मां तदाम्बिके ॥ ५९॥

स भ्रात्रा च तदा पत्न्या सुग्रीवाद्यैश्च वानरैः ।
लिङ्गानि स्थापयामास गन्धमादनमस्तके ॥ ६०॥

तीर्थानि कल्पयित्वाथ देवं रामेश्वरं तदा ।
शुद्धगङ्गाजलैः स्नाप्य पूज्य बिल्वैश्च पङ्कजैः ॥ ६१॥

प्रणम्य रामः साष्टाङ्गं तुष्टावाथ कृताञ्जलिः ।

—

रामः -

रामेश्वरेश्वर महेश पिनाकपाणे गम्भीरसागरनिषङ्ग भुजङ्गहार ।
द्रापिन्हिरण्मयशरीर सुचन्द्रमौले गङ्गोत्तमाङ्ग भव भूतपते नमस्ते ॥ ६२॥

विश्वोदयस्थितिलयान्तकर प्रसीद मामाशु पाहि ददया प्रमथाधिनाथ ।
दुर्वारदुःखतरसंसृतिबन्धनाशं शश्वत् कुरुष्व भगवन् करुणाकटाक्षैः ॥ ६३॥

पाहि प्रसीद परमेश्वर पञ्चवक्त्र भर्ग त्रियम्बक सुरासुरपूज्यपाद ।
पौलस्त्यसंहृतिभवाघभरं हरस्व मद्दुःखजालमपराधगणं क्षमस्व ॥ ६४॥

—

ईश्वरः -

इति स्तुतोऽहं रामेण तदा देवि ससीतया (?) ।
तं प्रसन्नस्तदा वाक्यमब्रवं प्रणतं शिवे ॥ ६५॥

मा भैषीः सर्वभद्रं ते कृतं लोकहितं त्वया ।
बद्धः सेतुः समुद्रे मे रावणः सानुजो हतः ॥ ६६॥

मत्प्रसादादभूद्राम गुरुस्ते कुम्भसम्भवः ।
एतस्य कृपया राम मत्प्रसादस्तवाभवत् ॥ ६७॥

राम शाम्भवसङ्गेन न किञ्चिदपि दुर्लभम् ।
शाम्भवाङ्गैकसङ्गेन पापभङ्गोऽभवत् तव ॥ ६८॥

रामेश्वरमिदं लिङ्गं त्वया संस्थापितं मम ।
एतस्य दर्शनात् सद्यः पापनाशो भविष्यति ॥ ६९॥

धनुष्कोटौ नरः स्नात्वा रामेशं यस्तु पश्यति ।
स हि मुक्तो भवत्येव तस्यैव कुलमुन्नतम् ॥ ७०॥

तस्यैव पितरस्तृप्तास्तेनोर्वी सफलाम्बिके ।
शाम्भवेभ्यो मुदा दत्वा स्नापयेद्यो महेश्वरम् ॥ ७१॥

गङ्गाभसा महादेवि बिल्वैरभ्यर्च्य यो हि माम् ।
श्रीमद्रामेश्वरं लिङ्गं मद्ज्ञानं प्राप्य मुच्यते ॥ ७२॥

गच्छ त्वं कोसलानाशु मत्प्रसादात् सुखी भव ।
इत्युक्त्वा तं तदा गौरि तस्मिन्लिङ्गे तिरोहितः ॥ ७३॥

अगस्त्यं मां प्रणम्यैव ययौ रामस्तदाद्रिजे ।
गत्वाऽश्वमेधं मत्तृप्त्यै समुपाहरदम्बिके ॥ ७४॥

तत्र राज्यं चिरं कृत्वा सोऽपि काले दिवं गतः ।
विष्णुर्मामम्बिके नित्यं सेतुमाधवसञ्ज्ञकः ॥ ७५॥

गङ्गाम्भसाभिषिच्येशं बिल्वैः सम्पूज्य भक्तितः ।
रामेश्वरं तदा गौरि तत्रास्ते मत्प्रसादतः ॥ ७६॥

—

सूतः -
य एतच्छृणुयान्नित्यं श्रीरामेश्वरवैभवम् ।
तस्य पापानि नश्यन्ति तूलमग्निमुखे यथा ॥ ७७॥

श्रीरामेश्वरलिङ्गमेतदमलं स्वर्गापवर्गप्रदं
बिल्वाद्यैरमरैस्तथा मुनिगणैः संसेवितं पूजितम् ।

दृष्ट्वा पापजरादिरोगरहितो मुक्तो भवत्यम्बिके
धन्यो मत्पदपूजकः सुकृतिनां मान्यो वरिष्ठः स हि ॥ ७८॥

॥ इति शिवरहस्यान्तर्गते शिवगौरीसंवादे रामेश्वरमहिमवर्णनं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । भर्गाख्यः पञ्चमांशः । अध्यायः २८॥

- .. shrIshivarahasyam . bhargAkhyaH panchamAMshaH . adhyAyaH 28..

Notes:
Having been cursed by Rishi Bhrigu, Shri Narayana is born in Prithviloka as Shri Rama and loses His wife to abduction by Ravana. During the attempt to reach Lanka for rescuing Sita, the distressed Rama worships Shiva at Mount Gandhamadana, as advised by Rishi Agastya (Kumbhasambhava). Thereafter, Rama builds the Setu to cross over to Lanka along with His army, and defeats Ravana to rescue Sita. Upon His victorious return, He bathes at Dhanushkoti and worships the Linga brought from Narmada river, which thereafter came to be known as Rameshwara Jyotirlinga. Vishnu resides there as Setu Madhava and worships the Rameshwara Jyotirlinga with water from River Ganga.

The shloka numbers have been maintained per the source text.

Proofread by Ruma Dewan

*Rameshvara Mahima Varnanam*
pdf was typeset on February 1, 2024

Please send corrections to *sanskrit@cheerful.com*